।।श्रीः।।

।।श्रीचन्द्रमौलीश्वरायनमः।।

# ।। श्रीवेदव्यासपूजापुरस्सरश्रीचातुर्मास्यव्रतसङ्कल्पमहोत्सवः ।।

शङ्करं शङ्कराचार्यं केशवं बादरायणं।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनःपुनः।।

अयि भोः भक्तिमन्तः।

श्रीशङ्करभगवत्पादाचार्यपरंपरागतमूलाम्नायसर्वज्ञपीठपूज्यश्रीकाञ्चीकामकोठिपीठाधिपतिजगद्गुरु श्रीजयेन्द्रसरस्वतीश्रीचरणाः तथा तदन्तेवासिवर्य पूज्यश्रीजगद्गुरुश्रीशङ्करविजयेन्द्रसरस्वतीश्रीचरणाश्च सर्वधारिसंवत्सरस्य चातुर्मास्यव्रतसङ्कल्पं भगवद्वेदव्यासपूजां च आषाढमासस्य तृतीयदिनाङ्कादारभ्य (१८-०७-२००८) श्रावणमासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं (१५-०९-२००८) श्रीकाञ्चीशङ्करमठे अनुष्ठास्यन्ति।

एतस्मिन् समये प्रातः प्रतिदिनं श्रीशङ्करभगवत्पादीयभाष्यप्रवचनं यथाक्रमं प्रचलिष्यति। चातुर्मासव्रतकाले चतुर्वेदपारायणम्, वेदविद्वत्सदः,वेदभाष्यसदः,अग्निहोत्रसदः, अद्वैतवेदान्तसदः, विविधशास्त्रसदः, पञ्चाङ्गसदः, उपन्यासाः, प्रख्यातगीतवाद्यकार्यक्रमाश्च यथायोग्यं प्रचलिष्यन्ति।

**गुरुतत्त्वस्य महिमा निस्सीमेति सम्यग्जानीमः कामकोटिकुटुम्बिनो वयम्। तपोज्योतिर्दीप्तानां यतिवरिष्ठानां भक्तवात्सल्यपराणां करूणासागरस्वरूपाणां श्रीकाञ्चीकामकोटिपीठाधिपति श्रीश्रीजयेन्द्रसरस्वतीश्रीपादानाम् अस्मद्गुरुनाथानां चतुस्सप्ततितम(७४) अवतारदिनमहोत्सवः सर्वधारिसंवत्सरस्य आषाढमासस्य पञ्चमदिनाङ्के श्रविष्ठानक्षत्रे भानुवासरे द्वितीयाशुभतिथौ (२०-०७-२००८) प्रचलिष्यति। अवतारपुरुषाणां चतुस्सप्ततितम जयन्तीमहोत्सवे भागभाक्त्वं जन्मसाफल्यलंभकम्। महोत्सवभागे जयन्तीदिने विशेषजपपारायणहोमपूजादीनि प्रचलिष्यन्ति।**

आस्तिकमहाजनाः भक्ताः सुहृदयाः कामकोटिशिष्यकुटुंबिनः सर्वेपि एषु विविधकार्यक्रमेषु भागभाजो भूत्वा जगद्गुरूणां श्रीमदाचार्यपादानां अनुग्रहभाजः सन्तः श्रीमहात्रिपुरसुन्दरीसमेतश्रीचन्द्रमौलीश्वरकृपया सकलं श्रेयः प्राप्नुयुरिति विज्ञापयामः।

इत्थं
सदा श्रीमठीयकैङ्कर्ये
श्रीकार्यं प्रतिनिधिश्च

काञ्चीपुरम्
वैशाखशुक्लसप्तमी
श्रीशाङ्करसंवत्सरं २५१८